हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-138 | 1 | मार्च 18, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः चैत्र कृष्ण चतुर्थी
तिथिः चैत्र 5 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलबजट २०२५: २१ वर्षायुपूर्णकर्तृभ्यः महिलाभ्यः १५०० रुप्यकाणि मुख्यमंत्रिणः घोषणाः

3 SCERT Solan- इ-पाठ्यक्रमस्य निर्माणार्थं राज्य-संसाधनव्यक्तिनां पञ्चदिवसीयप्रशिक्षण-कार्यशालायाः शुभारम्भः

4 नलबाड़ीस्थे एम. एन. सी. महाविद्यालये संस्कृत-संध्याकक्षायाः शुभारम्भः

## प्रधानमन्त्रिणा नरेन्द्रमोदिना कृता न्यूजीलैण्ड्-देशस्य स्वसमकक्षेण क्रिस्टोफर् लक्सन् इत्यनेन सह विशेषवार्ता



**हिमसंस्कृतवार्ताः।** नवदेहल्यां न्यूजीलैण्ड्-देशस्य स्वसमकक्षेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापः साधितः। चर्चायामस्यां भारत-न्यूजीलैण्ड् देशयोः सम्बन्धस्य विभिन्नाः पक्षाः सम्मिलिताः आसन्। श्रीमोदी अतिथिविशेषस्य सम्मानार्थ मध्याह्नभोजनम् अपि आयोजितवान्। स्ववक्तव्ये, श्री मोदी अवदत् यत्, असौ द्विपाक्षिक-सम्बन्धस्य विभिन्नेषु विषयेषु विस्तृतचर्चा कृतवान्, अपि च उभौ पक्षौ रक्षा-सुरक्षयोः सहभागितां सुदृढं संस्थागतं च कर्तुं निर्णयम् अकुरुताम्। श्रीमोदी उक्तवान् यत् संयुक्त-अभ्यासैः, प्रशिक्षणैः, नौकाश्रय-भ्रमणैश्च सह रक्षा-उद्योगक्षेत्रे अपि परस्परसहयोगाय अनेन मार्गः सज्जीभविष्यति । प्रधानमन्त्री अवदत् यत्, उभयोः देशयोः मध्ये परस्पर-लाभप्रदं मुक्तव्यापारसहभागितायां वार्तालापोपक्रमस्य निर्णयो सञ्जातः, येन परस्परव्यापारस्य निवेशस्य च सम्भावना वर्धयिष्यति। आतंकवादस्य, पृथकतावादीनां, चरमपन्थी-तत्त्वानां विरुद्धं भारत-न्यूजीलैण्ड्-देशयोः सहकारः निरन्तरं भविष्यति इति प्रधानमन्त्री अवदत्। सः अवदत् यत्, उभौ पक्षौ स्वतन्त्रं, मुक्तं, सुरक्षितं, समृद्धं च इण्डो-पेसिफिक् इत्यस्य समर्थनं कुरुतः, विस्तारवादे न तु विकास-नीतौ विश्वसतः । स्वस्य वक्तव्ये श्री लक्सन इत्येषः अवदत् यत् उभौ पक्षौ परस्परं लाभप्रदं मुक्तव्यापारसमन्वयं साधयितुं उत्सुकाः सन्ति इति। सः अवदत् यत्, न्यूजीलैण्ड्-देशः भारते स्वस्य कूटनीतिक-उपस्थितिं वर्धयिष्यति इति। श्री लक्सन् गतसायङ्काले राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मन्त्रणां कृतवान्।

विदेशमन्त्रालयस्य पूर्वसचिवः जयदीप मजूमदारः अवदत् यत्, गतवर्षे भारत-न्यूजीलैण्ड्-देशयोः मध्ये अनेके उच्चस्तरीयाः सम्पर्काः अभवन् इति। खालिस्तानीय-तत्त्वानां विषये चर्चायाः समये प्रश्नस्य एकस्य विषये सचिवः अवदत् यत् द्वयोः नेत्रोः मध्ये वार्तालापस्य समये अयं विषयः उद्धृतः इति। सः अवदत् यत्, भारतं तेषु देशेषु भारत-विरोधी-तत्त्वानां गतिविधीनां विषये, आतङ्कवादस्य वैभवीकरणार्थं भाषणस्वातन्त्र्यस्य तथा च अन्यानां लोकतान्त्रिकस्वातन्त्र्यानां च दुरुपयोगस्य विषये सावधानतामाचरति। मजूमदारः अवदत् यत्, न्यूजीलैण्ड्-देशस्य सर्वकारः ग्रहणशीलः अस्ति, अतीते अपि चिन्ताः स्वीकृतवान् अस्ति। इतः पूर्वं श्री लक्सन इत्येषः राजघट्ट गत्वा महात्मागान्धी-वर्यस्य समाधौ श्रद्धाञ्जलिम् समर्पितवान्।न्यूज़ीलैण्ड्-देशस्य प्रधानमन्त्री भारतस्य पञ्चदिवसीयप्रवासावधौऽ परह्यः नवदेहली-नगरं आगतवान्। तेन सह मन्त्रिणः, वरिष्ठाः अधिकारिणः, व्यापारिणः, सञ्चारमाध्यमाः, भारतीय-प्रवासी-समुदायस्य सदस्याः च समेत्य उच्च-स्तरीय प्रतिनिधिदलम् अस्ति। श्री लक्सन् वर्यस्य यात्रायाः उद्देश्यं उभयोः देशयोः मध्ये द्वैपाक्षिकसम्बन्धं सुदृढं कर्तुं, सर्वेषु क्षेत्रेषु सम्बन्धान् दृढतरं कर्तु, प्रत्येकैः जनैः सह सम्बन्धानां दृढीकरणम् इत्यस्ति। न्यूज़ीलैण्ड्-देशस्य प्रधानमन्त्री बुधवासरे मुम्बई-नगरं प्रति गमिष्यति।

## सुभाषितम्

**सर्पः दुर्जनयोः मध्ये,
वरं सर्पो न दुर्जनः।
सर्पो दशति कालेन,
दुर्जनस्तु पदे पदे।।**

सर्प व दुर्जन के मध्य सर्प अच्छा है क्योंकि सर्प तो कभी कभी समय आने पर ही काटता है परंतु दुर्जन हर समय काटता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## अमेरिकायाः राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गवार्ड इत्यनया सह रक्षामन्त्रिणः राजनाथसिंहेन उपवेशनं विहितम्

हिमसंस्कृतवार्ताः। नवदिल्ल्यां भारतस्य रक्षा-मन्त्रिणा श्रीराजनाथसिंहेन अमेरिकायाः राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गवार्ड इत्यनया सहोपवेशनं विहितम् । उपवेशनावधौ उभौ नेतारौ सबलं अङ्गीकृतवन्तौ यत् सामरिक सुरक्षा उभयोः देशयोः वैश्विक-सामरिक सहयोगस्य प्रमुखः स्तम्भः वर्तते। श्रीसिंहेन सुश्री-गबार्ड इत्यनया च भारत-अमेरिका-देशयोः सैन्याभ्यासस्य, सामरिक-सहयोगस्य, सूचना-संवहन-सहयोगस्य सहैव सामुद्रिकक्षेत्रेषु कृतायाः प्रमुखाप्रगतेः समीक्षा कृता। रक्षा-मन्त्रालयेन स्व-वक्तव्ये उक्तं यत् उभौ नेतारौ अत्याधुनिकरक्षा-नवाचारे विशिष्ट-प्रौद्योगिक्याञ्च सहयोगाय मार्गानन्वेष्टुं प्रयतितवन्तौ, अनेन पारस्परिक-सामरिक-हितस्य संवर्धनार्थं तयोः समर्पणं दृश्यते। मन्त्रालयेन इदमप्युक्तं यत् उभाभ्यामपि नेतृभ्यां अन्तरसञ्चालनस्य, नवाचारस्य संवर्धनार्थं रक्षौद्योगिकानां आपूर्ति-शृङ्खलानां समेधनार्थञ्चापि सम्बोधनं कृतम्। अस्माकं संवाददाता अवोचत् यत् एताभिः चर्चाभिः भारत-अमेरिका-द्विपक्षीय-रक्षा-सहयोगस्य संवर्धमानायाः शक्तेः पुष्टीभवति ।

## वक्फ (संशोधन) विधेयकं निर्धन-मुस्लिमवर्गाणां पक्षे अस्ति-

### संयुक्तसमित्याः अध्यक्षः जगदम्बिका पालः




हिमसंस्कृतवार्ताः। वक्फ (संशोधन) विधेयकविषये संसदः संयुक्तसमित्याः अध्यक्षेण जगदम्बिका पालेन उक्त यत् एतत् विधेयकं निर्धनमुस्लिमवर्गाणां पक्षे अस्ति। वक्फसंशोधनविधेयकस्य विषये अखिलभारतीयमुस्लिमपर्सनल लॉ मण्डलस्य विरोधे श्रीपालः नवदिल्ल्यां वार्ताहरैः सह संवादक्रमे उक्तवान् यत् अल्पसंख्यकसमुदायेषु सर्वकारं विरुध्य मिथ्यापवादाः प्रसार्यन्ते । सः अवदत् यत्, सर्वकारेण विधेयकं संयुक्तसंसदीयसमित्याः समीपे प्रेषितं येन मुस्लिमसङ्घटनैः अन्यैः हितधारकैश्च सह परामर्श कृत्वा न्यायपूर्ण सन्तुलितं च विध्याः निर्माणं भवेत्।

## अमेरिकीराष्ट्रपतिना नरेन्द्र मोदिनः पॉडकास्ट्-साक्षात्कारं स्वस्य Truth इति सामाजिक सन्जालीयपटले प्रसारितम्




हिमसंस्कृतवार्ताः। अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन अमेरिकी पॉडकास्टर-इति साक्षात्कर्ता ए.आइ.-संशोधकेन लेक्स-फ्रिड्डीन्-इत्यनेन सह प्रधानमन्त्रिणः नरेन्द्र मोदिनः पॉडकास्ट्-साक्षात्कारं स्वस्य Truth इति सामाजिक सन्जालीयपटले प्रसारितम्। साक्षात्कारे श्रीमोदिना राष्ट्रपतिट्रम्पेन सह स्वस्य सम्बन्धस्य विषये उक्तम्, तस्य सरलतायाः, अमेरिकादेशं प्रति समर्पणस्य च प्रशंसाम् अकरोत्। सः प्रथमकार्यकालस्य अपेक्षया अस्मिन् समये राष्ट्रपतिपदस्य कृते ट्रम्पः "इयोप्यधिकं सज्जः" इति बोधितवान् ।

# हिमाचलबजट २०२५: २१ वर्षायुपूर्णकर्तृभ्यः

## महिलाभ्यः १५०० रुप्यकाणि मुख्यमंत्रिणः घोषणाः

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे स्वस्य कार्यकालस्य तृतीयं बजटं प्रस्तुतवान्। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः सोमवासरे विधानसभायां २१ वर्षाणि पूर्णं कुर्वतीं प्रत्येकं पुत्रीं प्रतिमासं १५०० रुप्यकाणि दातुं योजनां घोषितवान्। मुख्यमंत्री सुक्खुः उक्तवान् यत् अस्याः योजनायाः संज्ञा 'इन्दिरागांधी प्रियभगिनी-सुखसम्माननिधियोजना' कृता। 1 जनवरी 2025 तः 31 मार्च, 2026 पर्यन्तं भविष्यति। सः अवदत् यत्, याः महिलाः परगृहेषु कार्यं कृत्वा स्वपरिवारं चालयन्ति, ताः अपि २०२५ तमस्य वर्षस्य जूनमासस्य प्रथमदिनात् एतस्याः योजनायाः अधिकारिण्यः भविष्यन्ति, तेषां पात्रकन्या अपि प्रतिमासं १५०० रूप्यकाणि प्राप्तुं अधिकारिण्यः भविष्यन्ति। सः अवदत् यत् पंचायतैः चयनितानां महिलानां कृते चरणबद्धरूपेण योजनायाः लाभः प्रदत्तः भविष्यति। मुख्यमंत्री सुक्खुः अवदत् यत् दरिद्रतारेखायाः अधः (बीपीएल) परिवाराणां द्वयोः पुत्र्योः कृते 'इन्दिरागांधीसुखशिक्षा योजना' इति नाम्ना नूतना योजना आरब्धा भविष्यति। अस्य अन्तर्गतं कन्यायाः जन्मसमये २५,००० रूप्यकाणां बीमा प्रदत्तं भविष्यति।




## बजट २०२५: पशुपालकानां कृते आश्रयः, मुख्यमंत्रिणा दुग्धस्य क्रयमूल्ये वृद्धिः घोषिता

हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दसिंहसुक्खुः स्वस्य तृतीयकार्यकालस्य बजटभाषणे पशुपालकानां कृते महतीं घोषणां कृत्वा दुग्धस्य क्रयमूल्ये प्रतिसेटकंभ ६ रुप्यकाणां वृद्धिं घोषितवान्। मुख्यमंत्री तथैव महिषस्य दुग्धं प्रतिसेटकं ६१ रुप्यकेन क्रियते, यत् ५५ रुप्यकाणां मूल्येन ६ रुप्यकाणां वृद्धिः भविष्यति। पूर्वं मुख्यमन्त्री राज्ये प्राकृतिककृषेः प्रवर्धनं प्रति बलं दत्त्वा प्राकृतिकमक्कायाः न्यूनतमसमर्थनमूल्यं ३० रुप्यकेभ्यः ४० रुप्यकाणि यावत् वर्धयितुं घोषितवान्। तस्मिन् एव काले प्राकृतिकगोधूमस्य न्यूनतमसमर्थनमूल्यं ४० रुप्यकात् ६० रुप्यकाणि यावत् वर्धयितुं घोषितम्।

हिमाचलबजट २०२५ : पेन्शनभोक्तृणां कर्मचारिणां च कृते महती समाचारः, बजटे बृहत् घोषणाः

1. ७० तः ७५ वर्षाणां मध्ये आयुषः पेन्शनभोगिनः मे १५ दिनाङ्कात् स्वस्य लम्बितांशं प्राप्तुं आरभन्ते।
2. चतुर्थ-तृतीय-द्वितीय-प्रथम-श्रेणी-कर्मचारिणः अपि स्वस्य लम्बित-अवशिष्टांशम् अपि प्राप्नुयुः।
3. सर्वकारीकर्मचारिभ्यः ३ प्रतिशतं महार्घतावृत्तिः प्रदास्यन्ते। मे १५ दिनाङ्कात् आरभ्यते।
4. अधुना बहिःनिर्मितकर्मचारिभ्यः १२,७०० रुप्यकाणि प्रास्यन्ति।
5. आंगनबाड़ी कार्यकर्तारः १०,५०० रुप्यकाणि प्राप्नुयुः।
6. मिनी-आंगनबाड़ी कार्यकर्ता ७३०० रुप्यकाणि प्राप्स्यन्ति।
7. आंगनबाड़ी-सहायिकाकार्यकर्तृभ्यः ५९०० रुप्यकाणि।
8. आशा-कार्यकर्तृभ्यः ५८०० रुप्यकाणि प्रदास्यन्ते।
9. सीवनशिक्षिकानां वेतने ५०० रुप्यकाणां वृद्धिः अभवत्
10. मध्याह्नभोजनकार्यकर्तृभ्यः ५००० रुप्यकाणि प्रदास्यन्ते।
11. जलरक्षकाणां कृते संप्रति प्रतिमासं ५६०० रूप्यकाणि वेतनं भविष्यति।
12. लोकनिर्माणविभागस्य (पीडब्ल्यूडी) बहूद्देश्यकार्यकर्तृणां वेतने अपि ५०० रुप्यकाणां वृद्धिः अभवत्
13. पंचायतरक्षकेभ्यः अपि ८५०० रुप्यकाणि प्रदास्यन्ते।
14. सम्प्रति राजस्वसङ्ख्यादारेभ्यः प्रतिमासं ४५०० रुप्यकाणि प्रदास्यन्ते।
15. एसएमसी तथा आईटी शिक्षकानां वेतने ५०० रुप्यकाणां वृद्धिः अभवत्।
16. बाह्याधारेण शल्यकक्षसहायकाः (आउटसोर्सड् ऑपरेशन थिएटर कर्मचारिणः) प्रतिमासं १७,८२० रुप्यकाणि प्राप्नुवन्ति।
17. बाह्याधारेण नियुक्तेभ्यः रेडियोलॉजिस्ट-इत्येतेभ्यः प्रतिमासं २५,००० इत्येव भवति।
18. मुख्यमन्त्री वृद्धावस्था-परिचर्यायोजनायां ७० वर्षाणाम् उपरि वरिष्ठनागरिकाणां कृते सुविधा।
19. स्वास्थ्यपरीक्षा गृहे एव भविष्यति

## नगरीयनिकायेषु मानदेयः

| पदम् | वेतनम्/ रुप्यकाणि |
|---|---|
| नगरनिगमस्य महापौरः | - 25,000 |
| नगरनिगमस्य उपमहापौरः | - 19,000 |
| नगरनिगमस्य पार्षदः | - 9400 |
| नगरपरिषदः अध्यक्षः | - 10,800 |
| नगरपरिषदः उपाध्यक्षः | - 8,900 |
| नगरपार्षदः | - 4500 |
| नगरपंचायत-प्रधानः | - 9,000 |
| नगरपंचायत-उपप्रधानः | – 7,000 |
| नगरपंचायतसदस्यः | – 4500 |

## हिमाचलबजट-२०२५

१. हरोलीक्षेत्रे स्वचालितचालनपरीक्षणस्य सुविधा।
२. पेट्रोलपम्पेषु ई-चार्जिंग-स्थानकानि निर्मितानि भविष्यन्ति।
३. नवीननगरनिकाये समाविष्टानां ग्रामाणां कृते आश्रयः। ३ वर्षाणि यावत् सम्पत्तिकरात् मुक्तिः।
४. नापितः, पानविक्रेता, लघुभोजनालयस्वामिनः, नगरेषु कियोस्कस्वामिभ्यः ऋणेषु संबलम्, ऋणस्य व्याजं सर्वकारः वहति।
५. हमीरपुरे १०० शय्या क्षमतायुक्तः क्रीडाछात्रावासः।
६. शिमलानगरे ५० शय्यायुक्तः क्रीडाछात्रावासः।
७. रिकोङ्ग पिओ, हरोली तथा जयसिंहपुरम् इत्यत्र क्रीडाछात्रावासाः।
८. शिमलायाः मैहली तथा काङ्गड़ायां सूचना-प्रौद्योगिकी वाटिकायां (आईटी पार्क) ६५० युवानः कार्याणि प्राप्स्यन्ति।
९. शिक्षाविभागे निदेशालयद्वयं निर्मितं भविष्यति, एकं विद्यालयानां कृते अपरं महाविद्यालयानाम् कृते।
१०. काङ्गड़ायां ५० शय्या क्षमतायुक्तः आयुषचिकित्सालयः।
११. पपरोलायां पञ्चकर्मचिकित्सा प्रारभ्यते।
१२. आचार्य चरकयोजना आरब्धा, रोगीणां निःशुल्क परीक्षणम्
१३. मादकद्रव्याणां दुरुपयोगं निवारयितुं विशेषकार्यदलम्।
१४. सर्वकारः बीपीएल परिवाराणां द्वयोः कन्ययोः बीमा करिष्यति। इन्दिरागांधी- सुखशिक्षायोजनायां सम्मिलिताः भविष्यन्ति।
१५. २१ वर्षाणाम् उपरि आयुषः सर्वासां पात्राणां महिलानां कृते जनवरी २०२५ तः प्रतिमासं १५०० रुप्यकाणां वृत्तिः प्रदास्यन्ते।

## गणमान्यजनानाम् मानदं वर्धितम्

जिलापरिषदः अध्यक्षः २५ सहस्ररुप्यकाणि
जिलापरिषदः उपाध्यक्ष १९ सहस्ररुप्यकाणि
जिलापरिषदः सदस्यः ८३०० रुप्यकाणि प्रतिमासं
पंचायतसमिति-अध्यक्षः १२ सहस्ररुप्यकाणि
पंचायतसमिति-उपाध्यक्षः ९ सहस्ररुप्यकाणि
पंचायतप्रधानः ७५०० रुप्यकाणि
उपप्रधानः ५१०० रुप्यकाणि
सदस्यः १०५० रुप्यकाणि प्रति गोष्ठी

1. खाद्यवाहनक्रयणे अनुदानं, १० लक्षरूप्यकाणां खाद्यवाहनस्य कृते ३ लक्षरूप्यकाणां अनुदानम्।
2. मुख्यमन्त्री स्टार्टअप योजना प्रारभ्यते।
3. होमस्टे, होटेल् च निर्मातुं सर्वकारः साहाय्यं करिष्यति।
4. जनजातीयरहितक्षेत्रेषु होमस्टे-होटेल्-निर्माणे ४%, आदिवासीक्षेत्रेषु ५% व्याजं च सर्वकारः वहति
5. कांगड़ा विमानस्थानकविस्तारः, निर्धारितसमये कार्यसम्पन्नः भविष्यति।
6. भूमि-अधिग्रहणानन्तरं कार्यं आरभ्यते।
7. विमानस्थानकस्य कृते 3000 कोटिरूप्यकाणां प्रावधानम्।
8. पारिस्थितिकपर्यटनम् : ७८ नवीनानि इकोपर्यटनस्थलानि वितरितानि भविष्यन्ति।
9. पर्यावरणपर्यटनात् ५ वर्षेषु सर्वकारः २०० कोटिरूप्यकाणि अर्जयिष्यति।
10. कृषिऋणेषु निरुद्धभूमिं निविदातः उद्धारयितुं सर्वकारेण नूतना योजना आनीता।
11. अधुना मत्स्यजीविभ्यः ७.५% स्वत्वशुल्कं (रायल्टी) गृहीतं भविष्यति, पूर्वं १५% आसीत् ।
12. १२० नवीनाः ट्राउट् यूनिट् स्थापनीयाः।
13. नूतनानां नौकानां कृते मत्स्यजीविभ्यः ६० प्रतिशतं अनुदानम्।
14. १०० ग्रामेषु सिञ्चनयोजनाः।

## कृषिः एवं वानिकी

1. कृषकाणां कृते १५०० प्रशिक्षणशिबिराणां आयोजनं भविष्यति।
2. मुख्यमन्त्री कृषिसंरक्षणयोजनायाः अन्तर्गतं सौरबाडीकरणहेतु सहायता।
3. उद्यानकार्यस्य कृते सार्वभौमिकपेटिकाः।
4. शिवापरियोजनायै १०० कोटिरूप्यकाणां व्ययः भविष्यति
5. उद्यानक्षेत्रे पञ्चकोटि डिजिटल मञ्चाः।
6. लीची, दाडिम, बीजपूरम् (अमरूद) इत्येतेषां कृते नवीनानि सोपानानि।
7. प्राकृतिक कृषितः हरिद्रा- उत्पादनम्।
8. हमीरपुरे स्पाइसपार्क-निर्माणम्।
9. प्राकृतिककृष्याः कच्चीहरिद्रायाः समर्थनमूल्यं प्रतिकिलो ९० रुप्यकाणि भवति।
10. एकलक्षं नवकृषकाः प्राकृतिककृषिणा सह सम्बद्धाः भविष्यन्ति।
11. कृषकाः हिमपरिवारेण सह सम्मिलिताः भविष्यन्ति।
12. प्राकृतिककृषेः मक्का-उत्पादनस्य न्यूनतमं समर्थनमूल्यं अधुना ४० रुप्यकाणि सन्ति।
13. गोधूमस्य समर्थनमूल्यं प्रतिकिलो ६० रुप्यकाणि अस्ति।
14. अधुना महिषस्य दुग्धं ६१ रुप्यकेन प्रतिकिलो, गोदुग्धं ५१ रुप्यकेन प्रतिकिलो मूल्येन क्रीयते।

# SCERT Solan- इ-पाठ्यक्रमस्य निर्माणार्थं राज्य-संसाधनव्यक्तिनां पञ्चदिवसीयप्रशिक्षणकार्यशालायाः शुभारम्भः



**हिमसंस्कृतवार्ताः सोलनम्।**
वर्तमानयुगे शैक्षणिकपाठ्यक्रमे विशालाः परिवर्तनाः भवन्ति, भारतसर्वकारस्य नूतनशिक्षानीतेः अस्यां दिशि प्रमुखं योगदानं वर्तते। नवीनशिक्षानीत्यानुसारं शिक्षाव्यवस्थां समयसापेक्षं कर्तुं अनेकानां प्रशिक्षणकार्यशालानाम् आयोजनं क्रियते अस्मिन् एव क्रमे हिमाचलप्रदेशे 17 मार्चतः 21 मार्चपर्यन्तं दीक्षापोर्टलस्य कृते ई-पाठ्यक्रमसामग्रीनिर्माणार्थं पञ्चदिवसीय-प्रशिक्षणकार्यशालायाः आयोजनं राज्यशैक्षणिका-नुसन्धानएवं प्रशिक्षणसंस्थानम् सोलनम् द्वारा क्रियते , येन एससीईआरटी-मध्ये विभिन्नासु कक्षासु पाठ्यमानं पाठ्यक्रमं सुलभं भवति। अस्यां कार्यशालायां हिमाचलस्य विविधेभ्यः जनपदेभ्यः राज्यसंसाधनव्यक्तिरूपेण शिक्षकाः प्रतिभागं कुर्वन्ति।

कार्यशालायाः उद्घाटनसत्रे एससीईआरटी सोलनम् इत्यस्य प्राचार्या प्रो. रजनी सांख्यायनः उक्तवती यत् शिक्षा प्रत्येकछात्रस्य मौलिकः अधिकारः अस्ति तथा च हिमाचलसदृशे राज्ये यत्र भौगोलिकविविधता वर्तते, तत्र प्रत्येकछात्राय शिक्षाप्रदानं विशालं आव्हानमस्ति, यस्य कृते आधुनिकयुगे दीक्षा पोर्टल् विशालं माध्यमं भवति, अतः दीक्षा पोर्टलमध्ये मानकीकृतशिक्षणसामग्र्याः उपलब्धता प्रशिक्षणस्य मुख्योद्देश्यमस्ति। कार्यशालायाः संयोजिका मंगेशकुमारी दीक्षा पटलस्य परिचयं कृत्वा तस्य आवश्यकतायाः उपरि बलं दत्तवती। एतेन सह द्वितीये सत्रे प्रशिक्षकेन ओईआर इत्यस्य विस्तरेण व्याख्यानं कृतम् यस्मिन् विभिन्नेभ्यः सामाजिकमाध्यमेभ्यः सामग्रीं ग्रहीतुम् अवधानतायाः अनुसरणं कर्तव्यम् इति विषये बलं दत्तम्। प्रशिक्षकस्य विजयपालपुण्डिरस्य इन्फोग्राफिक्स् विषये वक्तव्यम् अतीव प्रभावशाली आसीत्, यत्र प्रायोगिकप्रशिक्षणस्य उपरि बलं दत्तम् आसीत्, सः सर्वान् शिक्षकान् कैनवा इत्यस्य विस्तरेण अभ्यासं कृतवान्, तस्मिन् शिक्षणसामग्र्याः निर्माणपद्धतेः परिचयं कारितवान्। राष्ट्रगानेन कार्यशालायाः समापनं जातम्।

# हिमाचलसर्वकारः ५०० विद्युत्बसयानानि क्रीणाति



हिमसंस्कृतवार्ताः। हिमाचलबजट २०२५ : आगामिवित्तीयवर्षे हिमाचलप्रदेशे ५०० विद्युत्बसयानानि क्रीणाति राज्यसर्वकारः। एषा घोषणा मुख्यमन्त्री सुखविन्दरसिंहसुखु स्वस्य बजटभाषणे कृतवान्। अस्मात् पूर्वं ३२७ बसयानानां क्रयणस्य प्रक्रियां सर्वकारः चालयति । सोमवासरे स्वस्य बजटपत्रे मुख्यमन्त्री उक्तवान् यत् राज्ये मार्गयानं मुख्यं परिवहनं भवति। दूरस्थेषु क्षेत्रेषु अपि बससेवाः प्रदातुं सर्वकारः दृढनिश्चयः अस्ति । जनानां कृते स्वच्छानि हरितानि च परिवहनसेवाः प्रदातुं सर्वकारः डीजलबसयानानां ई-बसयानेषु परिवर्तनस्य प्रक्रियायां वर्तते। प्रक्रियानुसारं ई-बस-क्रयणस्य अतिरिक्तं २०२५-२६ तमे वर्षे ५०० अधिकानि ई-बस-यानानि क्रियन्ते । अपि च चार्जिंग् आधारभूतसंरचनानां आवश्यकतानां पूर्तये चार्जिंग् ई-स्टेशन्स् विकसिताः सन्ति, तेषां निर्माणस्य प्रक्रिया च विभिन्नेषु स्थानेषु प्रचलति।

# विश्वस्य सर्वोच्चः हिममैराथनस्पर्धा २३ दिनाङ्के लाहौलस्य सिस्सु-स्थाने, सेना-नौसेना, आईटीबीपी-कर्मचारिणः च भागं गृह्णन्ति



**हिमसंस्कृतवार्ताः - कुल्लूः।**
विश्वस्य सर्वोच्चस्य एशियायाः एकमात्रस्य च हिममैराथनस्य लाहौलस्य चतुर्थं संस्करणं मार्चमासस्य २३ दिनाङ्के लाहौलस्य सिस्सु-स्थाने भविष्यति। प्रायः ११,००० पादपरिमितस्य ऊर्ध्वतायां आयोजितः अयं अद्वितीयः कार्यक्रमः दीर्घदूरधावकानां अतिधावकानां च आह्वानं कृतवान् अस्ति ।
अस्मिन् वर्षे देशस्य ३०० तः अधिकाः प्रतिभागिनः मैराथनधावन-क्रीडायां भागं गृह्णन्ति, ये चतुर्षु वर्गेषु परस्परं स्पर्धां करिष्यन्ति – ४२ किलोमीटर् (पूर्ण-मैराथन्), २१ किलोमीटर् (अर्ध-मैराथन्), १० किलोमीटर्, ५ किलोमीटर् च। अयं कार्यक्रमः शीर्षस्थायित्वक्रीडकान् साहसिकप्रेमिणः च आकर्षयन् उच्चोच्चतायां हिममैराथन-क्रीडायां भारतं वैश्विकमान्यतां ददाति।
सेनाविमानचालकः स्नो मैराथनस्य इवेण्ट् चीफः कर्णलः अरुणनटराजनः अस्य आयोजनस्य पर्यावरणीयमहत्त्वस्य विषये बलं दत्तवान्। सः अवदत् यत् लाहौलस्य शिशिर-विस्मयभूमिः धावकानां साहसिक-प्रेमिणां च कृते रोमाञ्चकारी अनुभवं प्रददाति । इवेण्ट् संस्थापकः हिमालयस्य संरक्षणकर्ता च गौरवशिमरः मैराथनस्य पर्यावरणसन्देशे बलं दत्तवान्। सः अवदत् यत् अस्य आयोजनस्य उद्देश्यं हिमालयस्य, ट्रांसहिमालयस्य च पारिस्थितिक-आह्वानं प्रकाशयितुं वर्तते।

## सशस्त्रसेनायाः सैनिकाः अपि भागं गृह्णन्ति

स्नो मैराथन् इत्यस्य पूर्वसंस्करणेषु भारतीयसेनायाः, भारतीयनौसेनायाः च व्यापकं सहभागिता दृश्यते । अस्मिन् वर्षे भारतीयवायुसेनायाः २० सैनिकाः एतत् आह्वानं स्वीकुर्वन्ति । भारतीयसेनायाः लद्दाखस्काउट्, डोगरा, कुमाऊँ रेजिमेण्ट् इत्येतेषां एथलीट्-सहिताः २५ शीर्षधावकाः स्नो-मैराथन्-क्रीडायां भागं गृह्णन्ति । एतदतिरिक्तं आईटीबीपी, एसएसबी इत्यादीनि अर्धसैन्यबलानि अन्यैः सह स्वधावकानां बहिः क्रीडकानां च स्पर्धां दास्यन्ति।

# गोलीकाण्डविषये क्रुद्धा भाजपा, विधानसभा परिसरे विरोधप्रदर्शनम्




हिमसंस्कृतवार्ताः। भारतीयजनतापक्षस्य विधानपरिषदः नेतुः विपक्षस्य जयरामठाकुरस्य नेतृत्वे राज्यस्य गम्भीरकानूनव्यवस्थायाः स्थितिं प्रति चिन्ताम् प्रकटयन् विधानसभा परिसरे विरोधं कृतवान्। अत्र विपक्षनेता उक्तवान् यत् राज्ये यथा गिरोहयुद्धं भवति, तथैव हिमाचलप्रदेशे पूर्वं कदापि न अभवत्। सः अवदत् यत् भाटके प्रहारकान् आह्वयितुं गोलिकाप्रहारः हिमाचलस्य परम्परा नास्ति। सर्वकारेण सर्वेषां अपराधिनां विरुद्धं कठोरकार्यप्रक्रिया करणीया।

## यस्मिन् काले वैश्विकभूराजनीतिकोद्वेगः संवर्धते, तस्मिन् काले देशाः सामुद्रिकसहयोगं, संयुक्ताभ्यासं च कुर्वन्ति-राष्ट्रपतिः द्रौपदीमूर्मुः

हिमसंस्कृतवार्ताः। राष्ट्रपतिपदासीनया द्रौपदी मुर्मुवर्यया उक्तं यत् यस्मिन् काले वैश्विकभूराजनीतिकोद्वेगः संवर्धते, तस्मिन् काले देशाः सामुद्रिक सहयोगं, संयुक्ताभ्यासं च कुर्वन्ति। सा अवदत् यत् वैश्विकमञ्चे भारतस्य बृहत्तर- भूमिकया सह भारतीयनौसेनायाः समर्थने नौसेनासामग्रीप्रबन्धनसेवायाः नौसेनाशस्त्रसेवायाश्च अधिकारिणः महत्त्वपूर्णां भूमिकामाविष्कुर्वन्ति। राष्ट्रपतिना गतदिने राष्ट्रपतिभवने भारतीयनौसेनासामग्रीप्रबन्धनसेवायाः भारतीयनौसेनाशस्त्रसेवायाश्च अधिकारीप्रशिक्षुभिः सह संवादं कुर्वन्त्या एतत् प्रख्यापितम् ।

## जम्मू-कश्मीरे उत्तरकश्मीरस्य कुपवाड़ा-मण्डले संघर्षे एकः अज्ञातातङ्कवादी मृतः

हिमसंस्कृतवार्ताः। जम्मू-कश्मीरे उत्तरकश्मीरस्य कुपवाड़ा-मण्डले सुरक्षाबलानाम् आतङ्कवादिनां च मध्ये गतप्रातः संवृत्ते संघर्षे एकः अज्ञातातङ्कवादी मृतः। सेनाप्रवक्ता अवदत् यत् निगूढाः आतङ्कवादिनः सुरक्षाबलानाम् उपरि भुशुण्डिकाप्रहारं कृतवन्तः, येषां प्रतिकारे एकः आतङ्कवादी मृत्युमुपगतः। सङ्घर्षस्थलात् एकं एके-४७ भूशुण्डिका स्वायत्तीकृतास्ति ।

## दिल्ल्यारक्षिदलेन विशेषाभियानान्तर्गतं सप्तबाङ्ग्लादेशी-प्रवासिनः निगृहीताः

हिमसंस्कृतवार्ताः। दिल्ल्यारक्षिदलेन विशेषाभियानान्तर्गतं सप्तबाङ्ग्लादेशी-प्रवासिनः निगृहीताः। पूर्वी-जनपदस्य जनपदारख्यायुक्तेन अभिषेक-धानिया इत्यनेन विज्ञापितं यत् एते सर्वे भारत-बाङ्ग्लादेश-सीमायाः समीपवर्तिना नदीमार्गेण भारतं प्रविष्टाः सहैव निगडनभयात् दिल्ली-एनसीआर-क्षेत्रस्य विविधेषु स्थलेषु निगूढतया निवसन्तः आसन्। डीसीपी-धानिया इत्येषः अवोचत् यत् एतेषां निर्वासन-प्रक्रिया समरब्धा वर्तते।

# नलबाड़ीस्थे एम. एन. सी. महाविद्यालये संस्कृत-संध्याकक्षायाः शुभारम्भः




**हिमसंसकृतवार्ता - नलबाडी, असम ।** कुमारभास्करवर्म-संस्कृतपुरातना-ध्ययनविश्वविद्यालयस्य संस्कृतविकासकेंद्रस्य तत्वावधाने नलबाड़ीस्थे एम. एन. सी. महाविद्यालये संस्कृत-संध्याकक्षायाः भव्यः शुभारम्भः सम्पन्नः। अस्य कार्यक्रमस्य उद्घाटनं विश्वविद्यालयस्य यशस्विना कुलपतिना आचार्येण प्रह्लादेन राजोशीमहागेन उद्घाटनभाषणेन कृतम्।

कुलपतिः स्व'भाषणे संस्कृतभाषायाः भारतीयज्ञानपरम्परायाश्च महत्वं विशदरीकृतवान्। तेन उक्तम्—

"संस्कृतं भारतस्य प्राणभाषा अस्ति, या समग्रभारतीयज्ञानपरम्परायाः मूलाधाररूपेण वर्तते। संस्कृतस्य प्रचारप्रसाराय विश्वविद्यालयः निरन्तरं यत्नं करोति। अस्यैव परम्परायाः संवर्धनाय च स्थानीये एम. एन. सी. महाविद्यालये संस्कृत-संध्याकक्षायाः आरम्भः कृतः।"

अस्याः संध्याकक्षायां वैदिकगणितं, व्यवहारिकसंस्कृतम्, गायनकला, वादनकला, चित्रकला, योग-इत्यादीनां विविधविद्यानां पाठनं विशेषज्ञैः अध्यापकैः सम्पाद्यते।

कार्यक्रमे मुख्यातिथिरूपेण एम. एन. सी. महाविद्यालयस्य प्राचार्या डॉ. गार्गी चक्रवर्ती उपस्थिता आसीत्। तया विश्वविद्यालयस्य अस्य प्रयासस्य प्रशंसा कृता। सा अवदत्—

"संस्कृतस्य प्रचारप्रसारकार्ये महाविद्यालयः विश्वविद्यालयेन सह सदा कार्यं करिष्यति।"

विश्वविद्यालयस्य कुलसचिवः डॉ. विकासभार्गवशर्मा उपस्थितानां स्वागतं कृत्वा संध्याकक्षायाः विविधपाठ्यक्रमानां विवरणं प्रदत्तवान्। तेन उक्तम्—

"एतेषु पाठ्यक्रमेषु परीक्षायाः आयोजनं भविष्यति। सफलशिक्षार्थिभ्यः प्रमाणपत्रं वितरयिष्यते।"

अस्मिन् अवसरे वैदिकगणितस्य विशेषज्ञः डॉ. गणेशतालुकदारः, व्यवहारिकसंस्कृतस्य अध्यापिका श्रीमती ऋतुपर्णाशर्मा, चित्रकलायाः अध्यापिका डॉ. अमृतानायक, बांसुरीशिक्षकः श्री सत्येनदत्तः, सङ्गीतशिक्षिका श्रीमती बनश्री गोस्वामी, योगशिक्षकः श्री उत्पलदत्तः, सत्रियानृत्यशिक्षिका सुश्री काकलीदासादयः विशेषसम्मानं प्राप्तवन्तः।

कार्यक्रमस्य समापनं संस्कृतविकासकेंद्रस्य निदेशकः, संस्कृतसर्वदर्शनविभागस्य अध्यक्षश्च डॉ. रणजीतकुमारतिवारी धन्यवादज्ञापनं कृतवान्। तेन संस्कृतस्य प्रचारप्रसारकार्ये सर्वेषां सहयोगस्य अपेक्षा प्रकटिता।

अस्मिन् शुभावसरे विश्वविद्यालयात्, एम. एन. सी. महाविद्यालयात् अन्यमहाविद्यालय-विद्यालयेभ्यश्च छात्राः, अभिभावकाः, अध्यापकाः च उपस्थिताः आसन्। विशेषरूपेण सर्वदर्शनविभागस्य अध्यापिका डॉ. लोपामुद्रा गोस्वामी, मीमांसा-विभागाध्यक्षः डॉ. चंपककलिता, धर्मशास्त्रविभागाध्यक्षा डॉ. मैत्रेयी गोस्वामी इत्यादयः गणमान्यव्यक्तयः उपस्थिता आसन्।

कार्यक्रमस्य संचालनं पुराण-इतिहासविभागाध्यक्षः श्री विवेकाचार्यः कृतवान्।


अस्य संस्कृत-संध्याकक्षायाः शुभारम्भेण नलबाड्यां संस्कृतभाषायाः भारतीयसंस्कृतेश्च संरक्षणे संवर्धने च नवदिशा प्राप्ता।

# संस्कृतभाषया विश्वशान्तिः सम्भवति – श्रीमान्-मोहनकन्ननः




**हिमसंस्कृतवार्ता- अगरतला।** गतः 10 मार्च,2025 तः काठियावावा-निम्बार्काश्रमे अगरतलायां केन्द्रीयसंस्कृतविश्वविद्यालयस्य संस्कृताध्ययनकेन्द्रेन आयोजितस्य सप्तदिवसीय संस्कृतसम्भाषणवर्गस्य सफलसमाप्तिः जातः । समापनेकार्यक्रमे तत्रत्य भागग्रहितार्थिभिः विभिन्नकार्यक्रमाः यथा संस्कृतं गीतं, श्लोकं, नाटकादि प्रदर्शनं कृतम् । तत्र शिक्षार्थिरूपेन उपस्थिताः आसन् सामाजिकेषु सेवानिवृत्तजनाः, शिक्षकाः, छात्राः, व्यावसायिकाः, गृहिण्यः च । कार्यक्रमे मुख्यातिथिः रूपेन उपस्तितम् आसीत् संस्कृतभारती ईशान्यक्षेत्रस्य संगठनमन्त्री श्रीमान् मोहनकन्ननवर्यः । कन्ननवर्येन शिक्षार्थिन् उद्दिश्य संस्कृतस्य विषये परिस्थितिसापेक्षाकं भाषणं दत्तवान् । तोनोक्तम् यत् साम्प्रतिककाले समाजे जनाः समाजसंस्कारविषये, गृहसंस्कारविषये बारम्बारं वदन्ति किन्तु ते यदि संस्कृतसाहित्यानां सम्यक् अन्वेषणं कुर्वन्ति तर्हि तेषां सर्वेषां समस्यानां समाधानं तस्मादेव प्राप्नुवन्ति । एवम् अस्य कार्यक्रमस्य अध्यक्षरूपेण आसनम् अलङ्कुर्वन् काठियावावा-निम्बार्क-आश्रमस्य प्रमुखः श्री श्री भगवानदासकाठियावावा महाराजः सभापतेः भाषणे उक्तं यत् संस्कृतं विना अस्माकं आध्यात्मिकीजगतः पितृविहीनः सन्तानवत् भवति । आद्यात्मिकक्षेत्रे सम्यक्तया प्रवेशार्थम् संस्कृतभाषा एव सहायिकी भाषा भवति । आगामिनि काले संस्कृतसम्भाषणस्य क्रमः तस्य आश्रमे रक्षणं भवेदिति महाराजेन मतं प्रतटितम् । ततः परं शिविरसञ्चालकः श्रीनयनज्योतिशर्मणः कार्यक्रमे एव आश्रमे प्रतिसप्ताहं एकं दिनं संस्कृतस्य अभ्यासं कारयिष्यति मतं स्थापितम् । कार्यक्रमस्य सञ्चलनं तत्रत्य शिक्षार्थनौ अङ्किता-भट्टाचार्य तथा च समीर-घोषेण संस्कृतभाषया कृतम् । समग्र-कार्यक्रमस्य व्यवस्थायां विशेषरूपेन युक्तम् आसीत् समाजसेवकः श्रीमान् अभिजित-भट्टाचार्यवर्यः ।

## उपनिषद् रहस्यम्- ०२




यदा कश्चन मनुष्यः सर्वान् प्राणिनः परमात्मनि एव निरन्तरं पश्यति, तथा सर्वप्राणिष्वपि तं परमात्मानं हि पश्यति, तदा सः कस्यापि निन्दनं कर्तुं नार्हति, न वा कमपि कदापि च सः जुगुप्सते। परमात्मविषये सम्यक्तया ज्ञातवतः महापुरुषस्य कृते, अस्यां स्थितौ, सर्वाणि भूतानि परमात्मस्वरूपाणि एव भवेयुः। तस्मात् एकत्वम् अनुपश्यतः पुरुषस्य अनुभवे कः मोहः, कः वा शोकः हि अवशिष्यते? तस्मिन् तु केवलम् आनन्दः हि आनन्दः परिपूर्णः भवति।

सः महापुरुषः तेजोमयेन सूक्ष्मशरीरेण रहितः, छिद्ररहितः, स्नायुरहितः, पाञ्चभौतिकजन्येन स्थूलशरीरेण रहितः च भवति। सः अप्राकृतः, दिव्यः, सच्चिदानन्दस्वरूपः च भवति। सः शुभाशुभकर्मादिभिः सम्पर्कशून्यं परमात्मस्वरूपम् अधिगच्छति। यः परमात्मा सर्वद्रष्टा, सर्वज्ञः, ज्ञानस्वरूपः, सर्वोपरि विद्यमानः, सर्वनियन्ता, स्वयम्भूः, अनादिः, प्राणिभ्यः कर्मानुसारं यथायोग्यं फलदाता एवञ्च सर्वेषां स्रष्टा वर्तते। सः महापुरुषः एतादृशं परमात्मानं प्राप्नोति। यः मनुष्यः अविद्यायाः उपासनां करोति, सः तमसावृतम्, अज्ञानरूपं गर्तं प्रविशति। एवं यः विद्यारतः, परं मिथ्याज्ञानाभिमानेन उन्मुक्तः, एतादृशः मनुष्यः चेत् इतोऽपि अधिकतरे घोरान्धकारे निपतति। ज्ञानस्य यथार्थानुष्ठानेन एकविधं फलं भवति, तथा कर्मणः यथार्थानुष्ठानेन अपरविधं च फलं भवतीति कथ्यते। एवं प्रकारेण धीरपुरुषाणां वचनं श्रूयते, ये अनयोर्विषये पृथक्पृथक् रीत्या व्याख्यानं विधाय मनुष्यान्, अस्मान् वा सम्यक् बोधयन्ति इति।

**(ईश० ०६-१०)**

## *सामान्यज्ञानम्*

प्रश्नः 1. लोकप्रिय- गोपीनाथ-बोरदोलोई- अंतरराष्ट्रीय विमानपत्तनम् कुत्र अस्ति?
उत्तरम् : गुवाहाटी।

प्रश्नः 2. 'अभिधनरत्नमाला' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'हलायुधः'।

प्रश्नः 3. 'देवस्य समीपम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- 'उपदेवम्'। (अव्ययीभावः)

प्रश्नः 4. 'चापि' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'च + अपि'।

प्रश्नः 5. राष्ट्रीय- नौ- सेनादिवसः कदा भवति?
उत्तरम् – दिसम्बरमासस्य चतुर्थदिनांके।